# Shri Krishnanarayananamasahasra Stotram

# શ્રીકૃષ્ણનારાયણનામસહસ્રસ્તોત્રમ્

## Document Information

Text title : Shri Krishnanarayananamasahasra Stotram

File name : kRRiShNanArAyaNanAmasahasrastotram.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, stotra, sahasranAma

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 108/15-160||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# શ્રીકૃષ્ણનારાયણનામસહસ્રસ્તોત્રમ્

(શ્રીપુરુષોત્તમસામાખ્યમનાદિશ્રીકૃષ્ણનારાયણનામસહસ્રસ્તોત્રમ્)
અસ્ય શ્રીમત્કૃષ્ણનારાયણનામસ્તવસ્ય તુ ।
ઋષિઃ સર્વેશ્વરો લક્ષ્મિ ત્વહં શ્રીપુરુષોત્તમઃ ॥ ૧૫॥

છન્દોઽનુષ્ટુપ્ પરો દેવોઽનાદિકૃષ્ણનરાયણઃ ।
આક્ષરાખ્યો મહામુક્તો મુક્તાનીશો હિ બીજકમ્ ॥ ૧૬॥

શ્રીભૂલીલારમારાધાલક્ષ્મીમાણિક્ય એવ ચ ।
શક્તયો હૃદયં શ્રીમત્પુરુષોત્તમ સામ ચ ॥ ૧૭॥

ગોપાલકમ્ભરાબાલઃ કીલકં ચાઽસ્ત્રમાચ્યુતમ્ ।
પદ્માવતીરમાપદ્માસ્વામિને ચ વષટ્ નમઃ ॥ ૧૮॥

શૂલમીનધ્વજધનુર્બાણધ્રોઽસ્ત્રાય ફટ્ સ્વાહા ।
સર્વબાધાનિવૃત્ત્યર્થં જપેઽસ્ય વિનિયોજનમ્ ॥ ૧૯॥

બ્રહ્મલોકે વિરાજન્તં જુષ્ટં બ્રહ્મિષ્ઠમણ્ડલૈઃ ।
બ્રહ્મપ્રિયાસ્વામિનં તં ધ્યાયે સર્વાન્તરસ્થિતમ્ ॥ ૨૦॥

દિવ્યે લોમશક્ષેત્રે વૈ વિહરન્તં મનોહરમ્ ।
મન્દહાસં પૂર્ણકામં કાન્તં કૃષ્ણં વિચિન્તયે ॥ ૨૧॥

પુષ્ટં પ્રિયં કામદં ચ દુઃખહં સુખદં પ્રભુમ્ ।
ચત્વારિંશદૂર્ધ્વશતકાન્તં સ્મરામિ મોક્ષદમ્ ॥ ૨૨॥

ભુક્તિદં મુક્તિદં ચેષ્ટપ્રદં સર્વપ્રદં હરિમ્ ।
અનાદિશ્રીકૃષ્ણનારાયણં પતિં ભજામિ ચ ॥ ૨૩॥

કિરીટકુણ્ડલભૂષાભૂષિતં રૂપસુન્દરમ્ ।
આકર્ષકં શ્વેતવર્ણં બાલકૃષ્ણં નમામ્યહમ્ ॥ ૨૪॥

કોટ્યર્બુદાબ્જશક્તીનાં પતિં ચાત્મપતિં વિભુમ્ ।

પીતામ્બરં સતાં શ્રેષ્ઠં સેવે ચાત્મનિવેદનૈઃ ॥ ૨૫॥

નમોઽનન્તસ્વરૂપાય સર્વપાદાક્ષિવર્તિને ।
સહસ્રનામબોધ્યાય કામમાયેશ્વરાત્મને ॥ ૨૬॥

ૐ પ્રમાત્મા પરમાત્મા પરબ્રહ્મ પરેશ્વર ।
પુરુષોત્તમ ઈશેશશ્ચાક્ષરાધિપતિઃ પ્રભુઃ ॥ ૨૭॥

મુક્તેશ્વરોઽવતારેશો મુક્તાનીશો મહાપ્રભુઃ ।
અનાદિશ્રીકૃષ્ણનારાયણઃ શ્રીકૃષ્ણનન્દનઃ ॥ ૨૮॥

બાહ્યમૂર્તિશ્ચાત્મવૃત્તિઃ સર્વજ્ઞઃ શ્રીહરિર્વિભુઃ ।
અક્ષરો બ્રહ્મ ભગવાન્ વાસુદેવો નરાયણઃ ॥ ૨૯॥

નારાયણઃ સ્વયઞ્જ્યોતિર્બાલકૃષ્ણશ્ચિદમ્બરઃ ।
ધામેશઃ શાશ્વતાનન્દોઽવતારી પરમેશ્વરઃ ॥ ૩૦॥

ગોમાન્ દિવ્યગુણાગારઃ શ્યામસુન્દર આન્તરઃ ।
સન્ સનાતન આનન્દશ્ચિચ્ચિદાત્મા જડાન્વિતઃ ॥ ૩૧॥

ઋદ્ધિમાન્ ભૂતિમાન્ રાજા સઙ્કર્ષણો નિયામકઃ ।
ગોપાલો ગાઙ્ગતો ગોભૃદ્ગોપીનાથો ગવેશ્વરઃ ॥ ૩૨॥

પાર્ષદઃ પરિષત્પૂજ્યઃ પર્ષત્ પારિષદેશ્વરઃ ।
દિવ્યઃ શાન્તઃ શાન્તિદશ્ચ સત્ત્વઃ સત્ત્વપ્રકર્ષવાન્ ॥ ૩૩॥

સ્તવઃ શ્લોકઃ સ્મૃતિઃ શબ્દઃ કવિર્વેદો વિધિઃ પ્રધીઃ ।
આસનં ચાધિકરણં ધૃતિર્ધૈર્યં ક્ષમા યમઃ ॥ ૩૪॥

પ્રદ્યુમ્નો દ્યોતમાનશ્ચ દ્યૌઃ કાન્તઃ કમલાપતિઃ ।
અનિરુદ્ધોઽચ્યુતો ભૂમા મહાકાલો મહેશ્વરઃ ॥ ૩૫॥

મહાવિષ્ણુર્મધ્યવિષ્ણુર્વિષ્ણુર્વ્યાપક ઊર્ધ્વદૃક્ ।
વૈરાજઃ કારણં કર્તા કૃતિઃ કાર્યં નૃપો જપઃ ॥ ૩૬॥

કપિઃ ખપશ્ચેન્દ્રિયાર્થ ઋષીકેશઃ સમાધિમાન્ ।
યોગી યોગશ્ચક્રવર્તી ચક્રી શઙ્ખી ગદી ધ્વજી ॥ ૩૭॥

રથી ક્ષત્રી ચ નક્ષત્રી વૃત્તિશ્ચાવૃત્તિરુજ્જયી ।
અવ્યાકૃતશ્ચ સૂત્રાત્મા તુર્યપદં સુખાસ્પદમ્ ॥ ૩૮॥

સદાશિવશ્ચ દેવશ્ચ શિવઃ સંહારધર્મવાન્ ।
ધાતા પોષ્ટા વિધાતા ચ પિતા માતા સુહૃત્સખા ॥ ૩૯॥

પ્રાણનાથઃ સહાયશ્ચ સ્વામી ધાની ધની મખી ।
કોશો વિશ્વં મહાભૂતો ભાવઃ સમ્ભાવનાધિપઃ ॥ ૪૦॥

ગતિઃ કાન્તિઃ પાવનશ્ચ ચિદાભાસઃ ફલં ફલી ।
અન્તર્યામી પુરુષશ્ચ ક્ષેત્રજ્ઞઃ ક્ષેત્રમાર્ત્તિહા ॥ ૪૧॥

સાક્ષી પ્રધાનપુરુષઃ પ્રકૃતીશો ગુણાધિપઃ ।
ગોલોકેશોઽમૃતધામા વૈકુણ્ઠેશો રમાપતિઃ ॥ ૪૨॥

રાધાપતિઃ શ્રીનિવાસો દામોદરો વિભાવસુઃ ।
પ્રભાજાપો વામનશ્ચ ત્રિક્રમો ભૂરિવિક્રમઃ ॥ ૪૩॥

કેશવઃ કપિલઃ કાશી નૃસિંહો માપતિર્નિધિઃ ।
શ્રીશઃ સ્થાણુઃ સતીશશ્ચ શશી વિદ્યુદ્ધ્રુવો રવિઃ ॥ ૪૪॥

બ્રહ્માઽર્યમા વિષ્ણુરાતો હરો વૈષ્ણવસાત્ત્વતઃ ।
સાધુર્યતિર્બ્રહ્મચારી ભર્તા ધર્તાઽમરોઽમૃતમ્ ॥ ૪૫॥

વિભવઃ સમ્ભવો ભૂશ્ચ પુષ્કલો ભૂયસીપ્રદઃ ।
સ્વરો રાગો મૂર્છના ચ વાદશ્ચાલાપ ઉત્સવઃ ॥ ૪૬॥

સવઃ સત્રં મખો યજ્વા યજ્ઞો વહ્નિઃ પ્રહવ્યભુક્ ।
દત્તાત્રેયો મહામત્સ્યઃ પદ્મનાભોઽબ્જનેત્રકઃ ॥ ૪૭॥

કઞ્જહસ્તતલઃ શાર્ઙ્ગી વિશ્વકર્મા સુરાધિપઃ ।
શ્વેતક્રોડો વૃષભશ્ચ વૃષજન્મા વૃષાકપિઃ ॥ ૪૮॥

સૂતો વક્તા ગુરુઃ શાસ્ત્રં મહાચાર્યો મનુર્મધુઃ ।
ઈશ્વરોઽધ્યાપકઃ શાસ્તા ન્યાયો નેતા ચ નીતિમાન્ ॥ ૪૯॥

તર્કશ્ચ નિર્ણયો જ્યેષ્ઠ ઈશાનશ્ચ પુરાતનઃ ।
સનાતનશ્ચ સન્ન્યાસી મુનિર્વ્રતી ચ તાપસઃ ॥ ૫૦॥

હિરણ્યગર્ભો હરિણીકાન્તઃ કમલપત્તલઃ ।
વિદ્વાન્ વિદ્યાધરો વાગ્મી વાણીશો વર્ણિશીલભૃત્ ॥ ૫૧॥

ગૃહી ગૃહપતિર્ગોમા વપ્તા શ્રીવત્સલાઞ્છનઃ ।
વ્યાસોઽનાદિપ્રકર્ષશ્ચ દ્રષ્ટા શ્રીકૃષ્ણચન્દ્રકઃ ॥ ૫૨॥

કામ્ભરેયશ્ચ મેધાવી પ્રજાપતિર્દિવસ્પતિઃ ।
દિક્પતિઃ શ્રીપતિર્લક્ષ્મીપતિર્બ્રહ્મપતિર્નતિઃ ॥ ૫૩॥

કૃતજ્ઞઃ શરણં વિપ્રો વિવાહો વરરૂપવાન્ ।
વરહારશ્ચ સંવર્તો મણ્ડપોઽનઙ્ગ ઉત્તમઃ ॥ ૫૪॥

સર્વગર્ભો નરો વીર્યી પ્રજાત્મા વત્સરઃ સરઃ ।
દિવા દ્યુમણિરિષ્ટેષ્ટઃ સન્ધિર્દણ્ડઃ સુખં શમઃ ॥ ૫૫॥

દાનં દાતા સ્વત્વરૂપસ્ત્યાગઃ સ્નેહઃ સુમઙ્ગલમ્ ।
શકુનં શકુની પત્ત્રી હંસઃ શુકઃ કણઃ કૃષિઃ ॥ ૫૬॥

સ્ફુરણં ચ પ્રમા કૂર્મો રામો રૈવત આત્મવિત્ ।
પૃથુઃ પર્શુધરઃ ખડ્ગી ધન્વી રણી રથીષુધિઃ ॥ ૫૭॥

લક્ષ્યં ક્રમઃ પ્રત્યયશ્ચ સિદ્ધોઽજઃ શાશ્વતઃ શુભઃ ।
સ્વપ્રકાશો વસુઃ સત્યઃ સમદર્શી સમાયનઃ ॥ ૫૮॥

ભોગી શુક્લોઽર્જુનો દક્ષઃ પ્રત્યયઃ પ્રત્યગાત્મવાન્ ।
આમોદઃ સર્વયોનિશ્ચ પરમહંસ આર્થિકઃ ॥ ૫૯॥

નિર્વાણપાદઃ સુષિરઃ શિરાવ્યાપ્તઃ પૃથુશ્રવાઃ ।
સૌમ્યો રૌદ્રો નિગ્રહાત્મા સ્વારોહઃ સર્વગઃ પ્રભુઃ ॥ ૬૦॥

વિત્તિર્વેદ્યસ્વરૂપશ્ચ વેત્તા વેદનિધિર્વિધિઃ ।
વિશ્વક્સેનઃ સુસંસ્થાનોઽધ્યક્ષોઽપરોક્ષગોચરઃ ॥ ૬૧॥

કૃતોઽકૃતસ્ત્રિયુગશ્ચ લોકોઽલોકો રમાયનઃ ।
વ્યૂહોંઽશો વિભવશ્ચાર્ચાત્મકઃ સ્વરૂપ ઊર્જિતઃ ॥ ૬૨॥

સહનઃ સ્થાવરો ભોક્તા ફલદઃ સૃજિયત્નવાન્ ।
અમોઘો ગદહા વ્યાઘ્રો ગિરીશો ગિરિધારકઃ ॥ ૬૩॥

અનિર્વાચ્યઃ સુવાચ્યશ્ચ મહીધ્રો માણિકીધરઃ ।
સન્મૂર્તિઃ પાર્શ્વતિકેશો ગોવિન્દો ગરુડધ્વજઃ ॥ ૬૪॥

ઋષભો ગરુડઃ કલ્કિઃ કુમારો બુદ્ધિસર્જનઃ ।
હયશીર્ષાઃ સ્વર્ણવર્ણઃ સુરર્ષિઃ પદ્મજાપતિઃ ॥ ૬૫॥

મુક્તાપતિર્ભૂપતિશ્ચ મુક્તપતી રમાવસુઃ ।

વિશ્વાવસુઃ સિંહરૂપો નિમિષશ્ચ બૃહસ્પતિઃ ॥ ૬૬॥

મરુદ્ધનં મનસ્તેજોઽમ્બરં દિગમ્બરઃ શ્રુતિઃ ।
ત્રિપાત્પાદઃ સર્વપાચ્ચ પ્રપાતા મૃદુવર્તનઃ ॥ ૬૭॥

મિષ્ટઃ સમ્ભ્રમણઃ શેષઃ સ્વાગતં સન્નવાર્તિકઃ ।
અસઙ્ખ્યાક્ષઃ શિષ્ટધર્મા ધર્મવર્મા પ્રસિદ્ધિમાન્ ॥ ૬૮॥

નારાયણીનિવહશ્ચ શિવરાજ્ઞીસતીપતિઃ ।
માધવીશો ભાર્ગવીશસ્તૂલસીનાયકો બૃહત્ ॥ ૬૯॥

દેહી દેહીશ્વરો રત્નં પુણ્ડ્રં પુણ્ડ્રધરઃ પુમાન્ ।
વિધૃતિઃ સર્વસેતુશ્ચ નાકો જલાન્ શિખી સ્મૃતિઃ ॥ ૭૦॥

સંસ્કારો ગુરુતા માનં સામાન્યં વરદો વહઃ ।
પ્રતિષ્ઠા સ્કન્નભાવશ્ચ ધુર્વહો યાનમગ્રણીઃ ॥ ૭૧॥

દેવો મેરુર્ગરુત્માઁશ્ચ પ્રાજ્ઞ આર્ષશ્ચતુર્મુખઃ ।
કૃપસ્તીર્થં સાવનશ્ચ મેધો વાર્ધિઃ રસઃ શયઃ ॥ ૭૨॥

ભદ્રઃ સુતઃ શૂરવીરસ્તારકઃ સ્થવિરો યુવા ।
અર્કઃ પ્લક્ષઃ શરભશ્ચ ગજો ગજાનનો મૃગઃ ॥ ૭૩॥

સમયો હેતુરુદરં ભાગ્યં તારસ્તમઃ કલા ।
આવેશઃ પ્રણવો બીજં પ્રયોજનં ધનં ક્ષમઃ ॥ ૭૪॥

ઋતુર્યૂપો વત્સલશ્ચ ધનેશઃ સોમપઃ પુરુઃ ।
સ્થૂલઃ સૂક્ષ્મશ્ચ લિઙ્ગં ચ સુપર્ણોઽનશનો મૃધઃ ॥ ૭૫॥

કીશો જયો ભાગવતઃ સાત્ત્વતો યન્ત્રચેતનઃ ।
મન્ત્રો મુકુન્દો વિશ્વાસઃ પત્નીવ્રતઃ પ્રદક્ષિણમ્ ॥ ૭૬॥

જીવોઽનન્તોઽન્તકશ્ચાર્હો નન્દો દાતા ગુહા ગૃહમ્ ।
કલશઃ પિપ્પલો વૃન્દાદ્રુમઃ કલ્પલતાશયઃ ॥ ૭૭॥

સ્તમ્ભો વાસ્તુર્મહાકુણ્ડશ્ચાયુધં કમ્બલઃ કરઃ ।
કારુઃ શિલ્પી વાત્સ્ય આપ્તસ્ત્વષ્ટા સ્તરઃ પ્રરોચનઃ ॥ ૭૮॥

અશોકઃ ખદિરો બિલ્વો વટઃ પલાશ આમલઃ ।
ઉદુમ્બરઃ કદલીશઃ પૂગો રાજેશ્વરો રતિઃ ॥ ૭૯॥

દમ્પતી કુમુદો મોદો નન્દનઃ શ્રીધરઃ સ્મરઃ ।
શ઼ૃઙ્ગારો દાસ્યદો નેમિર્બિન્દુર્ભસ્મ ભ્રમિર્મહઃ ॥ ૮૦॥

કેશવઃ કામકૃજ્જિષ્ણુર્બ્રહ્મણ્યો વાસુકિઃ પ્રિયઃ ।
લેખો બિમ્બઃ પ્રતિબિમ્બો નિરોધો દીર્ઘિકા પયઃ ॥ ૮૧॥

પ્રપા પાનં પિશઙ્ગશ્ચ પિઙ્ગાક્ષો ગાયકો ગયઃ ।
નર્તકો નટકો માયી મન્ત્રી તન્ત્રી જિતેન્દ્રિયઃ ॥ ૮૨॥

કલ્પમણિર્મહાવીર્યં મહદ્રજોઽગ્ર્યપૂરુષઃ ।
સાધુજનઃ સ્ત્રીજનશ્ચાઽવ્યયો વધૂજનાત્મકઃ ॥ ૮૩॥

સ્તન્યપઃ સાધ્યદેવશ્ચ ધર્મજન્યો વૃષાસુતઃ ।
ઋતમ્ભરશ્ચમત્કારઃ સ્વાહાકારશ્ચ કર્મઠઃ ॥ ૮૪॥

આરાર્ત્રિકં ચાઽભિષેકો મુકુટઃ કણ્ઠિકાપ્રિયઃ ।
સિન્દૂરકઃ કુઙ્કુમં ચ દૂર્વા વ્રીહિર્યવસ્તિલઃ ॥ ૮૫॥

નાગવલ્લી ચેક્ષુદણ્ડઃ શ્રીફલો ભક્તિવર્ધનઃ ।
પૂગીફલસ્વરૂપશ્ચ સુગન્ધઃ શ્રેય આરમઃ ॥ ૮૬॥

શ્રીમયઃ શ્રીકૃતવેષઃ શ્ર્યઙ્ગઃ શ્ર્યાનન્દસમ્પ્રદઃ ।
શ્રીતિલકઃ શ્રીકૃતોરુઃ શ્રીશયઃ શ્રીકથાશ્રયઃ ॥ ૮૭॥

શ્રીસેવઃ શ્રીસમવાયઃ શ્ર્યશનઃ શ્રીસમાધિમાન્ ।
લક્ષ્મીલક્ષ્મા મહાલક્ષ્મીભવો લક્ષ્મીવિભાવનઃ ॥ ૮૮॥

લક્ષ્મીપાર્શ્વો મહાલક્ષ્મીગર્ભો લક્ષ્મીધરાઽધરઃ ।
બ્રહ્મજ્ઞો બ્રહ્મપરમો બ્રહ્મજપોઽનૃણી મણિઃ ॥ ૮૯॥

અતિથિઃ પૂર્ણચન્દ્રશ્ચ દેવયાનો નભોગતિઃ ।
જગદ્ગુરુર્જયાનાથો લલિતાકાન્ત એકલઃ ॥ ૯૦॥

સ્તુતિર્જપઃ સ્થિતિઃ સ્થૈર્યં સત્તા ભૂતિર્વિભૂતિમાન્ ।
હર્ષઃ પઞ્ચાત્મકઃ સાક્ષી સારઃ સ્નેહઃ સુસમ્પવાન્ ॥ ૯૧॥

કાષાયવેષો દીપ્તાત્મા પઞ્ચાગ્નિતાપસો નગઃ ।
નાગો નિરાશો નપ્તા ચ કામફલં કુમારકઃ ॥ ૯૨॥

સ્વસ્તિકઃ પ્રતિભારૂપઃ પ્રતિજ્ઞાત્મા પ્રમાપકઃ ।
સહજઃ સ્વભવઃ શઙ્કુઃ કુશઃ શાલશિલઃ શિવઃ ॥ ૯૩॥

ચૈત્યો ગર્તશ્ચ હુઙ્કારો જઘનં વીથિરજ્વરઃ ।
ઉદ્ગીથશ્ચોપનિષચ્ચ પુરાણપુરુષઃ શનીઃ ॥ ૯૪॥

સત્પરઃ સન્નિવાસશ્ચ શ્રીદ્રુમોઽસુરનાશકઃ ।
કુઞ્ચિકાત્મા બ્રહ્મરન્ધ્રં બ્રહ્મહ્રદો મહાધ્રુવઃ ॥ ૯૫॥

પરિધિઃ કિરણં કેશઃ પઞ્ચશિખઃ પરાસનઃ ।
પ્રવર્ગ્યશ્ચ મહોપાયો વિશિષ્ટો વિદ્રુમો વશઃ ॥ ૯૬॥

મોદકસ્તણ્ડુલશ્ચાપામાર્ગો દેવાધિદૈવતમ્ ।
દેવાનીકતિલકશ્ચ મહાશ્વપટ્ટસારસઃ ॥ ૯૭॥

જામાતા ધર્મવૃદ્ધશ્ચ સઙ્કલ્પો મધુપર્કકઃ ।
સર્વતોભદ્રરૂપશ્ચ પીઠો વેદિર્બલિર્જલમ્ ॥ ૯૮॥

સ્થણ્ડિલો મણિક્ષેત્રેશઃ પાદ્મક્ષેત્રમહેશ્વરઃ ।
લોમશાનન્દદઃ પત્નીવ્રતવંશપ્રભાકરઃ ॥ ૯૯॥

ઇન્દ્રદ્યુમ્નસ્થલીરક્ષો નારસિંહવનેશ્વરઃ ।
વ્યાઘ્રારણ્યનિવાસશ્ચ રુક્માઙ્ગદેષ્ટસમ્પ્રદઃ ॥ ૧૦૦॥

પ્રાભાસિકઃ પ્રભાનુશ્ચ સોમક્ષેત્રપ્રપોષકઃ ।
સામપદ્મનિશાનાથોઽનાદિકૃષ્ણઃ પ્રજાપતિઃ ॥ ૧૦૧॥

વસન્તશ્ચ કિશોરશ્ચ મહેન્દ્રઃ શમ્પ્રદઃ સહઃ ।
મઙ્ગલેશો માનસેશો રેવેશો વિરજાપતિઃ ॥ ૧૦૨॥

રતીશો ગોમતીશશ્ચ કામદુઘેશ્વરોઽતુલઃ ।
એકાદશીપતિઃ સ્વર્ણરેખાકાન્તો હ્યમૂર્તકઃ ॥ ૧૦૩॥

નન્દિનીશશ્ચ દોલેશઃ પુષ્પં કલાવતીપતિઃ ।
બદરીશશ્ચ પમ્પેશો દર્પહા બાન્ધવો ધવઃ ॥ ૧૦૪॥

ભક્તવત્સલ ઉન્નેતા માનકૃલ્લોકધૃગ્ધરઃ ।
ધન્યશ્ચતુર્ભુજો દુર્ગસ્તન્તુકૃત્ સુકૃતં કૃતી ॥ ૧૦૫॥

સુન્દરશ્ચાશ્વમેધશ્ચ પર્જન્યશ્ચામૃતાપતિઃ ।
સુલભોઽદુર્લભોઽશ્વત્થો રક્ષોહા દૈત્યનાશનઃ ॥ ૧૦૬॥

સપ્તાશ્વઃ સપ્તજિહ્વશ્ચ પ્રાગ્વંશશ્ચ પ્રભાતકઃ ।

આશ્રમશ્ચ યમઃ સૂર્યચન્દ્રનેત્રસ્ત્રિનેત્રકઃ ॥ ૧૦૭॥

વિયન્નાભિર્ભૂચરણોઽનિલાઽસુર્દિક્છ્રવા ધ્રુકઃ ।
અગ્ન્યાનનશ્ચ બસ્ત્યબ્ધિઃ સર્વવર્ષ્મા રમોઽરમઃ ॥ ૧૦૮॥

ઘનશ્યામો હિતસ્તથ્યો બ્રહ્મધામા સ્વધામવાન્ ।
નિત્યશ્ચ ચેતનશ્ચાન્તર્યામી વિશેષવિત્તિમાન્ ॥ ૧૦૯॥

કાર્યકારણરૂપશ્ચાયોજકો ધૃતિમાન્ પદી ।
પ્રત્યયિતઃ શ્રુતિગમ્યો વાક્યકૃત્સઙ્ખ્યિતોઽવ્યયઃ ॥ ૧૧૦॥

સ્વસ્તિદાતા સ્વસ્તિકર્તા સ્વસ્તિરૂપઃ પ્રશસ્તિમાન્ ।
સૃષ્ટ્યધિષ્ઠાનમુત્તુઙ્ગો ગોલકઃ કં ચ ખં ખગઃ ॥ ૧૧૧॥

મધ્યાવસ્થો મધ્યવાસઃ સન્ધ્યાંશોઽભિજિદાત્મકઃ ।
અમૃતશ્ચ શુભો લાભઃ ક્ષેમકૃત્ સિદ્ધિનાયકઃ ॥ ૧૧૨॥

ધન્વન્તરિર્નલો નાલઃ પ્રવાહો દધિમણ્ડપઃ ।
પુત્રઃ સ્વર્ગશ્ચાશીરાત્મા પ્રલયો વૈષ્ણવાર્ચિતઃ ॥ ૧૧૩॥

નવનીતોઽપવર્ગશ્ચ હૃદ્દીપઃ પરમાર્થદઃ ।
કાલમાયાપાપકર્મયમદૂતભયાપહા ॥ ૧૧૪॥

દ્વારં દ્વારી ચન્દ્રશાલો ઘૃતાશી ચાઽદ્વિતીયકઃ ।
બહુપ્રજોઽપ્રજો જાગ્રત્ પ્રાજનનોઽન્તરઙ્ગકઃ ॥ ૧૧૫॥

ગ્રન્થો ગ્રન્થિર્નાગરશ્ચ સીમાન્તઃ સીમવર્જિતઃ ।
અબાધ્યશ્ચાઽપરિચ્છિન્નોઽવિવર્તોઽપરિણામકઃ ॥ ૧૧૬॥

અવચ્છેદક ઐશ્વર્યં લક્ષણં લક્ષ્યમીશનીઃ ।
ઈતિઃ કવલમન્નં ચ સનાતનતમઃ સનઃ ॥ ૧૧૭॥

વંશી કદમ્બકઃ કીલઃ સમાજઃ સાર્થ આદરઃ ।
ઉદારો દ્વ્યાત્મકઃ શ્રેષ્ઠી ત્રિયુગો યુગલાત્મકઃ ॥ ૧૧૮॥

સ્ત્રીપતિઃ સ્વપતિઃ પ્રાપ્તિસ્તાદાત્મ્યં નિર્મિતિઃ કૃતિઃ ।
તત્ત્વં સ્વત્વમભિપ્રાયશ્ચેષ્ટોદ્ભવશ્ચ ભાવનઃ ॥ ૧૧૯॥

ઉદયોઽયઃ પ્રમેધશ્ચ સુષુમ્ણામૂર્તિદર્શનઃ ।
દાનં દમો દયા દિષ્ટં દિતિર્દર્વી ચ દોહનમ્ ॥ ૧૨૦॥

વક્તા વાચયિતા લેખયિતાઽધ્યાપક ઊહવાન્ ।
વાઙ્મનોઽગોચરઃ પુણ્યં પુણ્યશ્રુતિજપાર્હણઃ ॥ ૧૨૧॥

જીવનં મન્દહાસઃ સત્પથાચારઃ પણો રણઃ ।
આત્મજશ્ચાગમેયશ્ચ નૈગમેયો હ્યનાવરઃ ॥ ૧૨૨॥

અસઙ્ખ્યશ્ચૈકસઙ્ખ્યશ્ચ નિર્ભયો ભયનાશકઃ ।
આધ્વરો હવનાદશ્ચ ભાવાદનો ભવાપહઃ ॥ ૧૨૩॥

ઊર્ધ્વવીર્યોઽપ્રસ્ખલનો વિઘ્નહા ચ નરોત્તમઃ ।
દુઃસ્વપ્નનાશકઃ શાન્તિપ્રદઃ પ્રમોદકારકઃ ॥ ૧૨૪॥

આકર્ષકોઽક્ષયપાત્રં પર્યવસાનમૌરસઃ ।
વ્યાહૃતિર્વ્યવહારશ્ચ સ્ફુર્તિશ્ચૈકાક્ષરો ધ્વનિઃ ॥ ૧૨૫॥

ભુક્તિદો મુક્તિદઃ પાપક્ષાલનઃ પુણ્યદઃ પ્રથઃ ।
ખ્યાત્યાત્મા સર્વસેનશ્ચ દિક્તારો નાદ ઈપતિઃ ॥ ૧૨૬॥

સ્ફોટો નૌકા ફલં પુષ્પં પિષ્ટં સદસદાત્મકઃ ।
બ્રહ્મસૂત્રં કઙ્કણં ચ સદ્ધેતુઃ સર્વહેતિમાન્ ॥ ૧૨૭॥

મૂલં મૂલોત્તરં મૂલાદિમઃ સર્વાન્તસંસ્થિતઃ ।
આલયશ્ચ તલં સર્વોદરઃ સર્વશરીરકઃ ॥ ૧૨૮॥

અન્વયો વ્યતિરેકશ્ચ નિત્યયુક્તો નમઃપુરઃ ।
સમ્પન્નો વિકસદ્ભાવો વિશ્વસદ્ભાવ ઓન્નમઃ ॥ ૧૨૯॥

ઇતીદં પાવનં પુણ્યં સર્વબાધાવિનાશકમ્ ।
અનાદિશ્રીકૃષ્ણનારાયણનામ્નાં સહસ્રકમ્ ॥ ૧૩૦॥

પુરુષોત્તમસામાખ્યં સ્તોત્રં લક્ષ્મિ મયોદિતમ્ ।
શ્રોતુર્વક્તુઃ કીર્તયિતુર્મન્તુર્નશ્યત્યઘાનિ વૈ ॥ ૧૩૧॥

ઇહાઽમુત્ર ન બાધા સ્યાદ્વિઘ્નનાશો દ્રુતં ભવેત્ ।
વિપ્રો વિદ્વાન્ બ્રહ્મવિત્સ્યાચ્છૂરઃ ક્ષત્રો જયી ભવેત્ ॥ ૧૩૨॥

ધની શ્રેષ્ઠી વૈશ્યવર્ણો ભવેચ્છૂદ્રઃ સુખી ભવેત્ ।
બ્રહ્મચારી ચમત્કારી ગૃહી સ્ત્રીસમ્પદન્વિતઃ ॥ ૧૩૩॥

વની વન્યર્દ્ધિસમ્પન્નો ભવેત્ સાધુઃ પ્રશાન્તિમાન્ ।
વિન્દેધ્દ્ધર્મં ધર્મરુચિશ્ચાર્થેચ્છુરર્થવાન્ ભવેત્ ॥ ૧૩૪॥

કામેચ્છુઃ કામસમ્પત્તિં મુમુક્ષુર્મોક્ષમૃચ્છતિ ।
રાજ્યાર્થી રાજ્યમાવિન્દેત્પ્રજાર્થી તુ પ્રજાં લભેત્ ॥ ૧૩૫॥

પુત્રાર્થી પુત્રમૃચ્છેદ્વૈ ભાર્યાર્થી સ્ત્રીં લભેન્નવામ્ ।
કન્યાર્થી કન્યકામૃચ્છેત્ પત્યર્થિકા પતિં લભેત્ ॥ ૧૩૬॥

વિદ્યાર્થી પ્રાપ્નુયાદ્વિદ્યાં ધનાર્થી ધનમાપ્નુયાત્ ।
વૃત્ત્યર્થી વૃત્તિમાન્ સ્યાચ્ચ ભોગાર્થી ભોગવાન્ ભવેત્ ॥ ૧૩૭॥

ઇષ્ટાર્થી ચેષ્ટમૃચ્છેચ્ચ ગૃહાર્થી ગૃહમાપ્નુયાત્ ।
નિત્યં પ્રાતઃ પઠેદ્ભક્ત્યા શુદ્ધાન્તઃકરણસ્તુ યઃ ॥ ૧૩૮॥

પ્રધાનતાં યશઃ ખ્યાતિં શ્રિયં શ્રેયશ્ચ વિન્દતિ ।
ભયં નૈવ ભવત્યસ્ય તેજો વીર્યં ચ વર્ધતે ॥ ૧૩૯॥

નીરોગો જાયતે પાઠાત્પુષ્ટો બલી ગુણી ભવેત્ ।
રૂપવાન્ જાયતે રમ્યઃ કામ્યો ભવતિ પાઠનાત્ ॥ ૧૪૦॥

બન્ધનં શીર્યતે વક્તુર્ભયં નશ્યતિ સર્વથા ।
આપત્તયો વિનશ્યન્તિ નશ્યન્તિ શત્રવોઽપિ ચ ॥ ૧૪૧॥

દુર્ગાણિ સુગમાન્યેવ ભવન્તિ સ્તુવતઃ ખલુ ।
પુરુષોત્તમશરણઃ સ્યાત્પુરુષોત્તમભક્તિમાન્ ॥ ૧૪૨॥

માયાઞ્જનરહિતાત્મા લભતે પુરુષોત્તમમ્ ।
મદ્ભક્તસ્યાઽશુભં નાસ્તિ સંસારસ્ય ભયં ન ચ ॥ ૧૪૩॥

દુરીતં જન્મ મૃત્યુશ્ચ વ્યાધિર્જરા ન રુગ્ણતા ।
મોઘતાઽભિભવો નૈવ મદ્ભક્તસ્ય પ્રજાયતે ॥ ૧૪૪॥

એતત્પાઠાદ્ભવેદાત્મસુખં શાન્તિઃ સુસમ્પદઃ ।
સ્મૃદ્ધિઃ શ્રીઃ કીર્તિરૌદાર્યં પ્રાધાન્યં પુષ્ટિરીશિતા ॥ ૧૪૫॥

મુક્તા ઈશાઃ પિતરશ્ચ સિદ્ધા દેવા મહર્ષયઃ ।
એતત્સ્તોત્રજપેનૈવ સિદ્ધિં પરમિકાં યયુઃ ॥ ૧૪૬॥

આયુષ્માન્ ભવતે શ્રુત્વા નિષ્પાપઃ પઠનાદ્ભવેત્ ।
શ્રદ્ધાભક્તિયુતો વક્તા પ્રેત્ય ચેહ પ્રમોદતે ॥ ૧૪૭॥

મયાઽનાદિકૃષ્ણનારાયણેન તે પ્રભાષિતમ્ ।

લક્ષ્મિ સ્તોત્રં મત્પરં તત્પાઠાન્મત્પરમો ભવેત્ ॥ ૧૪૮॥

અપિ શ્લોકૈકપાઠેન પાઠોઽસ્યાપિ કૃતો ભવેત્ ।
શ ृણુ લક્ષ્મિ ચમત્કારમયં શ્લોકં વદામિ તે ॥ ૧૪૯॥

“નમામિ સૃષ્ટિત્રયસંવિધાયિને
ભજામિ કોટ્યર્બુદશક્તિશાલિને ।
ધ્યાયામિ ચાત્માન્તરસન્નિયામિને-
અર્પયામિસર્વત્વમથાઽઽત્મવેદિને” ॥ ૧૫૦॥

નમોઽનન્તસ્વરૂપાય નમોઽસઙ્ખ્યપ્રમૂર્તયે ।
નમો યુગલરૂપાય નમઃ શ્રીપરમાત્મને ॥ ૧૫૧॥

નમોઽનાદિકૃષ્ણનારાયણાય સ્વામિને નમઃ ।
નમઃ શ્રીકમ્ભરાલક્ષ્મીગોપાલજનુષે નમઃ ॥ ૧૫૨॥

નમોઽનાથાધિનાથાય નમઃ કાન્તાકૃપાલવે ।
નમો ધર્માધિગોપ્ત્રે તે બાલકૃષ્ણાય તે નમઃ ॥ ૧૫૩॥

શિવરાજ્ઞીસ્વામિને તે નારાયણીશ્વરાય ચ ।
રમાપદ્માવતીશાય નારાયણાય તે નમઃ ॥ ૧૫૪॥

નમો બ્રહ્મપ્રિયેશાય શ્રીકૃષ્ણાય ચ તે નમઃ ।
સર્વજ્ઞદેશિકેશાયાચાર્યેશ્વરાય તે નમઃ ॥ ૧૫૫॥

સ્તવશ્ચાયં પઠિતશ્ચાર્પિતસ્ત્વયિ ફલાપ્તયે ।
સર્વદસ્ત્વં પાહિ કૃષ્ણનારાયણ નમો નમઃ ॥ ૧૫૬॥

સહસ્રપાઠતશ્ચાઽસ્ય પુરશ્ચરણમાચરેત્ ।
મહાઽઽપદો વિનશ્યન્તિ મહાસૌખ્યં ભવેદ્ધ્રુવમ્ ॥ ૧૫૭॥

વિજ્ઞાનં સર્વતત્ત્વાનાં વર્ધતેઽસ્ય પ્રપાઠનાત્ ।
સાર્વજ્ઞ્યકલ્પતા સ્યાચ્ચ કૃષ્ણસ્ય કરુણાકણાત્ ॥ ૧૫૮॥

રાજા પ્રધાનઃ પૃથિવીપ્રધાનઃ
સ્વર્ગપ્રધાનો ધનદપ્રધાનઃ ।
વિદ્યાપ્રધાનોઽર્હણતાપ્રધાનો
ભવેત્ સ્તવસ્યાઽસ્ય સુપાઠકૃજ્જનઃ ॥ ૧૫૯॥

નિત્યમેકપ્રપાઠેન સર્વકામસમૃદ્ધિમાન્ ।

જાયતે મે કૃપાલેશાલ્લક્ષ્મિ તદ્ગૃહમાવસ ॥ ૧૬૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૦૮-અધ્યાયાન્તર્ગતં પુરુષોત્તમસામાખ્યં શ્રીપુરુષોત્તમસામાખ્યમનાદિ-
શ્રીકૃષ્ણનારાયણનામસહસ્રસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૦૮/૧૫-૧૬૦॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 108/15-160..

Proofread by PSA Easwaran

*Shri Krishnanarayananamasahasra Stotram*
pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*